पाठ–20

# समयप्रज्ञा



कश्चन ग्रामः आसीत्। तत्र कश्चन युवकः आसीत्। तस्य नाम दुर्गादासः। सः बुद्धिमान्।

एकदा सर्वे ग्रामीणाः रात्रौ निद्रायां मग्नाः आसन्। तदा कुतश्चित् 'चोरः चोरः' इति आक्रोशध्वनिः श्रुतः। सर्वेऽपि ग्रामीणाः तत् श्रुत्वा त्वरया उत्थाय लवित्रं, दण्डः- इत्यादीनि आयुधानि स्वीकृत्य यतः ध्वनिः श्रुतः तत्र समायाताः।

तत्र दुर्गादासं दृष्ट्वा सर्वे- "चोरः कुत्र अस्ति?" इति पृष्टवन्तः। दुर्गादासः समीपे स्थितं न्यग्रोध–वृक्षं दर्शितवान्। सर्वे न्यग्रोधवृक्षं परितः तथा स्थितवन्तः यथा चोरः कुत्रापि धावितुं न शक्नुयात्।

चन्द्रस्य प्रकाशे कोऽपि चोरः न दृष्टः। किन्तु तत्र वृक्षमूले कश्चन व्याघ्रः आसीत्। सः लंघनं कृत्वा ततः धावितुम् उद्युक्तः आसीत्। तदा एव तेषु जनेषु अन्यतमः, "केभ्यश्चित् दिनेभ्यः पूर्वम् अन्धकारे एकः जनः अनेन एव मारितः। अपरः व्रणितः कृतः। एषः अवश्यं मारणीयः" इति उक्तवान्।

अनुक्षणमेव जनाः तदुपरि पाषाणखण्डान् क्षिप्तवन्तः। सः व्याघ्रः वृक्षमूलतः कूर्दनम् अकरोत्। सर्वे मिलित्वा लवित्रैः दण्डैश्च ताडयित्वा तं व्याघ्रं मारितवन्तः।

अनन्तरं जनाः दुर्गादासं दृष्ट्वा- "किं भोः! नरमांसभक्षकः व्याघ्रः आगतः। भवान् तु 'चोरः चोरः' इति किमर्थम् आक्रोशं कृतवान्?" इति पृष्टवन्तः।

दुर्गादासः मन्दहासपूर्वकं- "यदा अहं 'चोरः चोरः' इति आक्रोशं कृतवान् तदा भवन्तः सर्वे आयुधैः सह गृहात् बहिः आगतवन्तः। परं यदि अहं 'व्याघ्रः व्याघ्रः' इति आक्रोशम् अकरिष्यं तर्हि किं भवन्तः सर्वे आगमिष्यन्? गृहद्वाराणि सम्यक् कीलयित्वा अन्तः एव अस्थास्यन्। अतः एव अहं 'चोरः चोरः' इति आक्रुष्टवान्" इति उक्तवान्।

सर्वे जनाः दुर्गादासस्य समयप्रज्ञां श्लाघितवन्तः।

## अभ्यासः

1. के व्याघ्रं मारितवन्तः?
2. समयप्रज्ञापाठेन का शिक्षा प्राप्यते?
3. कः 'चोरः चोरः' इति आक्रोशं कृतवान्?

★★★